पाषण्डः, पुं, (पापं सनोति दर्शनसंसर्गादिना ददातीति। षणु ञ दाने + अमन्तात् डः। पृषोदरादित्वात् साधुः। यद्वा, पाति रक्षति दुष्कृतेभ्य इति। पा + क्विप्। पा वेदधर्म्मस्तं षण्डयति खण्डयतीति। यदुक्तम्।
"पालनाच्च त्रयीधर्म्मः पाशब्देन निगद्यते।
तं ष(ख)ण्डयन्ति ते यस्मात् पाषण्डास्तेन हेतुना॥
नानाव्रतधरा नानावेशाः पाषण्डिनो मताः॥")
वेदविरुद्धाचारवान् सर्व्ववर्णचिह्नधारी। बौद्धक्षपणकादिः। इति भरतः॥ तत्पर्य्यायः। सर्व्वलिङ्गी २। इत्यमरः।२।७।४५॥ कौलिकः ३ पाषण्डिकः ४। इति शब्दरत्नावली॥ *॥ पाषण्डादिसम्भाषणे दोषो यथा,—
"तस्मात् पाषण्डिभिः पापैरालापं स्पर्शनं त्यजेत्।
विशेषतः क्रियाकाले यज्ञादौ चापि दीक्षितः॥
क्रियाहानिर्गृहे यस्य मासमेकं प्रजायते।
तस्यावलोकनात् सूर्य्यं पश्येत मतिमान् नरः॥
किं पुनर्य्यैस्तु सन्त्यक्ता त्रयी सर्व्वात्मना द्विज!।
पाषण्डभोजिभिः पापैर्व्वेदवादविरोधिभिः॥
पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान् शठान्।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत्॥
दूरापास्तस्तु संसर्गः सहास्या वापि पापिभिः।
पाषण्डिभिर्दुराचारैस्तस्मात्तान् परिवर्ज्जयेत्॥
एते नग्नास्तवाख्याता दृष्टा श्राद्धोपघातकाः।
येषां सम्भाषणात् पुंसां दिनपुण्यं प्रणश्यति॥
एते पाषण्डिनामानो ह्येतान्न आलपेद्बुधः।
पुण्यं नश्यति सम्भाषादेतेषां तद्दिनोद्भवम्॥
पुंसां जटाधरणमौण्ड्यवतां वृथैव
मोघाशिनामखिलशौचनिराकृतानाम्।
तोयप्रदानपितृपिण्डवहिष्कृतानां
सम्भाषणादपि नरा नरकं प्रयान्ति॥"
इति विष्णुपुराणे ३ अंशे १८ अध्यायः॥ *॥
पाषण्डादीनां लक्षणं यथा,—
"भ्रष्टः स्वधर्म्मात् पाषण्डो विकर्म्मस्थो निषिद्धकृत्।
यस्य धर्म्मध्वजो नित्यं सुरध्वज इवोच्छ्रितः॥
प्रच्छन्नानि च पापानि वैडालं नाम तद्व्रतम्॥
तद्वान् वैडालव्रतिकः॥
प्रियं वक्ति पुरोऽन्यत्र विप्रियं कुरुते भृशम्।
व्यक्तापराधचेष्टश्च शठोऽयं कथितो बुधैः॥
सन्देहकृद्धेतुभिर्यः सत्कर्म्मसु सहैतुकः।
अर्व्वाग्दृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः॥
शठो मिथ्याविनीतश्च वकवृत्तिरुदाहृतः॥"इति।
एतट्टीकायां स्वामी॥ *॥ अपि च।
सदाशिव उवाच।
"येऽन्यदेवं परत्वेन वदन्त्यज्ञानमोहिताः।
नारायणाज्जगद्वन्द्यं ते वै पाषण्डिनस्तथा॥
कपालभस्मास्थिधरा ये ह्यवैदिकलिङ्गिनः।
ऋते वनस्थाश्रमाच्च जटावल्कलधारिणः।
अवैदिकक्रियोपेतास्ते वै पाषण्डिनस्तथा॥
शङ्खचक्रोर्द्ध्वपुण्ड्रादिचिह्नैः प्रियतमैर्हरेः।
रहिता ये द्विजा देवि! ते वै पाषण्डिनो मताः॥
श्रुतिस्मृत्युक्तमाचारं यस्तु नाचरति द्विजः।
स पाषण्डीति विज्ञेयः सर्व्वलोकेषु गर्हितः॥
समस्तयज्ञभोक्तारं विष्णुं ब्रह्मण्यदैवतम्॥
उद्दिश्य देवताश्चैव जुहोति च ददाति च।
स पाषण्डीति विज्ञेयः स्वतन्त्रो वापि कर्म्मसु॥
स्वातन्त्र्यात् क्रियते यैस्तु कर्म्म वेदोदितं महत्।
विना वै भगवत्प्रीत्या ते वै पाषण्डिनः स्मृताः॥
यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः।
समत्वेनैव वीक्षेत स पाषण्डी भवेत् सदा॥
अनास्था क्रियते यैस्तु मनोवाक्कायकर्म्मभिः।
वासुदेवं न जानाति स पाषण्डी भवेद् द्विजः॥
हरेर्नामैकमन्त्राभ्यां लोकाः सद्भिर्विवर्ज्जिताः।
यदि वर्णाश्रमाद्या ये ते वै पाषण्डिनः स्मृताः॥
वर्णानां गुरवो नित्यं शिवे यद्यप्यवैष्णवाः।
भगवद्धर्म्मरहिता वैष्णवादिविनिन्दकाः॥
रजस्तमोमया जीवहिंसका जीवभक्षकाः।
असत्प्रतिग्रहरता देवला ग्रामयाजकाः॥
भ्रष्टाचारास्तथा व्रात्या नानाविबुधपूजकाः।
देवतोच्छिष्टश्राद्धादिभोजिनः शूद्रवत्क्रियाः॥
विविधासत्कर्म्मरता भक्ष्याद्यविचारिणः।
लोभमोहमदक्रोधकामाहङ्कारिणः सदा॥
एवंविधाः पारदारिकाद्या येऽत्र शुभानने!।
अन्येषां का कथा तत्र पाषण्डा ब्राह्मणाः स्मृताः॥
वर्णाश्रमाद्या ये मर्त्याः स्वस्वधर्म्मविवर्ज्जिताः।
ते वै पाषण्डिनो देवि! नारायणवहिर्मुखाः॥
सर्व्वाशिनो द्विजा येऽपि सर्व्वविक्रयिणस्तथा।
षड्वेदाचाररहितास्ते वै पाषण्डिनो मताः॥
ये त्वसद्भक्ष्यपानादिरता लोका निरन्तरम्।
शिवे! पाषण्डिनो ज्ञेया इह ते नात्र संशयः॥
विष्णुवैष्णवगोभूमिदेवादिषु विशेषतः।
अश्वत्थतुलसीतीर्थक्षेत्रादिषु महागुरौ॥
लक्ष्मीसरस्वतीगङ्गायमुनासु वरानने!।
स्मृताः पाषण्डिनस्तेऽपि ये न सेवापरायणाः॥
रुद्राक्षेन्द्राक्षभद्राक्षस्फाटिकाक्षादिधारिणः।
जटिला भस्मलिप्ताङ्गास्ते वै पाषण्डिनः प्रिये!॥
असिजीवी मसीजीवी धावकः पाचकस्तथा।
एते पाषण्डिनो विप्रा मादकद्रव्यभोजिनः॥
देवि! कार्ष्णादयो भक्ता अनन्यशरणास्तु ये।
पाषण्डसङ्गं न कुर्य्युस्तद्गेहे पानभोजने॥
यदि दैववशाल्लोभान्मोहात्तस्यान्नभोजनम्।
तत्स्पर्शं जलपानञ्च चक्रुस्तत्सङ्गमादिकम्॥
तत्पानभोजनालापसङ्गालिङ्गनतोऽचिरात्।
पाषण्डिनो वैष्णवाः स्युरन्येषामपि का कथा॥
किमत्र बहुनोक्तेन ब्राह्मणा ये ह्यवैष्णवाः।
असदाचरणाच्चेत् स्युस्तदा पाषण्डिनः स्मृताः॥
एतद्भोजनपानादिकर्म्मभिर्वैष्णवा जनाः।
पाषण्डिनस्तथा स्युर्व्वै जटाभस्मादिधारिणः॥"
इति पाद्मोत्तरखण्डे पाषण्डाचरणं नाम ४२ अः॥
तस्य त्याज्यत्वं यथा,—
"त्यज पाषण्डसंसर्गं सङ्गं भज सतां सदा।
कामं क्रोधञ्च लोभञ्च मोहञ्च मदमत्सरौ॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः॥ *॥
तस्य राष्ट्राद्बहिष्कर्त्तव्यता यथा,—
"कितवान् कुशीलवान् क्रूरान् पाषण्डस्थांश्च मानवान्।
विकर्म्मस्थान् शौण्डिकांश्च क्षिप्रं निर्व्वासयेत् पुरात्॥
एते राष्ट्रे वर्त्तमाना राज्ञः प्रच्छन्नतस्कराः।
विकर्म्मक्रियया नित्यं वाधन्ते भद्रिकाः प्रजाः॥"
इति मानवे ९ अध्यायः॥
अपि च।
"आक्रुष्टांश्च तथा लुब्धान् दृष्टार्थांस्तत्त्वभाषिणः।
पाषण्डिनस्तापसादीन् परराष्ट्रेषु योजयेत्॥"
इति युक्तिकल्पतरुः॥

पाषण्डकः, पुं, (पाषण्ड एव। स्वार्थे कन्।) पाषण्डः। इति शब्दरत्नावली॥

पाषण्डी, [न्] पुं, (पां त्रयीधर्म्मं षण्डयतीति। पा + षण्ड + णिनिः।) पाषण्डः। इति जटाधरः॥ (यथा, मनुः। ४। ३०।
"पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान् शठान्।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत्॥")

पाषाणः, पुं, (पषति पीडयत्यनेनेति। पष पीडने + बाहुलकात् आनच्। "पषेर्णिच्।" २। ९०। इत्युज्ज्वलदत्तोक्त्या स च णित्।) प्रस्तरः। तत्पर्य्यायः। ग्रावः २ उपलः ३ अश्मा ४ शिला ५ दृषत् ६। इत्यमरः। २।३।४॥ दृशत् ७। इति भरतः॥ प्रस्तरः ८ पाराशुकः ९ पारटीटः १० मरुः ११ काचकः १२। इति शब्दरत्नावली॥ (यथा, देवीभागवते। ४। २१। ५४।
"गतेऽथ नारदे कंसः समाहूयाथ बालकम्।
पाषाणे पोथयामास सुखं प्राप च मन्दधीः॥"
पाषाणादिनिर्म्मितत्वात् देवताप्रतिमादि। यथा, आर्य्यासप्तशत्याम्। ३८६।
"पूजां विना प्रतिष्ठां नास्ति न मन्त्रं विना प्रतिष्ठा च।
तदुभयविप्रतिपन्नः पश्यतु गीर्व्वाणपाषाणम्॥")

पाषाणगर्द्दभः, पुं, हनुसन्धिजक्षुद्ररोगविशेषः। तल्लक्षणमाह।
"वातश्लेष्मसमुद्भूतः श्वयथुर्हनुसन्धिजः।
स्थिरो मन्दरुजः स्निग्धो ज्ञेयः पाषाणगर्द्दभः॥"
स्थिरः कठिनः॥ *॥ तच्चिकित्सा यथा,—
"पाषाणगर्द्दभं पूर्व्वं स्वेदयेत् कुशलो भिषक्।
ततः पनसिकाप्रोक्तैः कल्कैरुष्णैः प्रलेपयेत्॥
वातश्लैष्मिकशोथघ्नैः कल्कैरन्यैश्च लेपयेत्।
परिपाकगतं भित्त्वा व्रणवत्तमुपाचरेत्॥
जलौकाभिर्हृते रक्ते स शाम्यति विनौषधम्।
एतत्तुल्यस्वेषु बहुषु प्रेषितं लिखितं ततः॥"
इति भावप्रकाशः॥

पाषाणचतुर्द्दशी, स्त्री, (पाषाणसाध्या पाषाणवत्पिष्टकभोजनसाध्या चतुर्द्दशी।) वृश्चिकराशिस्थरविकशुक्लपक्षीयचतुर्द्दशी। यथा, भविष्ये।